Shri Raghunath Temple MSS. Library,
JAMMU

No. २०६५-घ

Title श्रीबाला पद्धति कवचादि

Author

Extent २० Age

Subject तन्त्रम्

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीबाला पद्धति पूजा पाठ स्तोत्र
कवचादि

१०७५

© Dharmartha Trust J&K. Digitized by eGangotri

सं० १८०४ पुस्त

ज्वाला पद्धति क्रमचादि

१०, पत्राणि

लेखक - ...

© Dharmartha Trust J&K. Digitized by eGangotri

॥त्रि०॥ श्रीगणेशायनमः।ओंनमोबालात्रिपुरायैनमः।श्रीपार्वत्युवाच।देवदेवजगन्नाथ
॥१॥ भक्तानांहितकाम्यया।किंचिद्गोप्यंचपृच्छामितन्ममाचक्ष्वशंकर॥१॥कवचानिब
हूमंत्राणिकथितानिममप्रभो।इदानींबालिकावर्मश्रोतुमिच्छामिशंकर॥२॥श्रीशिवोवा
च।यद्गुह्यंपरमंलोकेकार्यसाधनमुत्तमं।स्कंदस्यापिहियद्गोप्यंकथयामितवप्रिये॥३॥बा
लामेमस्तकेपातुललाटेविंध्यवासिनी।श्रोत्रद्वयंप्रात्तसाचतालरंध्रेसुगंधनी॥४॥भ्रूम
ध्येसकाजननीजिह्वांरसनिवासिनी।मुखेषण्मुखजननीनेत्रेमाःअंबकेश्वरी॥५॥दंता
न्रक्षतुकामाक्ष्याओष्ठेसिंहाद्रिवासिनी।चिबुकंधूम्रदमनीकंठेवैमुंडमालिनी॥६॥स्कंधो
इंद्रायणीरक्षेद्बाह्वोबाहूबलप्रदा।हस्तयोरामजननीकरयुग्मंमहेश्वरी॥७॥अंगुल्याका
लरात्रीचहस्तपृष्ठेजनेश्वरी।हृदयेकालिकादेवीपृष्ठपार्श्वेधनेश्वरी।नाभौमेरोहिणीर
क्षेद्गुह्येगुह्यकपालिनी।कटौमेअंबिकारक्षेत्मेढ्रेचैवसरस्वती॥८॥अपानेग्राहिणीर
क्षेदुरुभ्यांमेघवाहिनी।जानुभ्यांविजयारक्षेज्जंघाभ्यांगुणकन्यका॥१०॥रसकोणाचगु ॥१॥
ल्फाभ्यांग्रहकोणाचपादयोः।अंगुल्यांनारसिंहीचपादपृष्ठेमितौजसी॥११॥पूर्वेसहस्र

© Dharmartha Trust J&K. Digitized by eGangotri

नेत्रा च। अग्नेय्यां मेषवाहना। याम्यां च महिषारूढा। नैरृत्यां नरगामिनि ।१२। प्रतीच्यां
जलसंपूर्णा। वायव्यां दीर्घलोचना। उदीच्यां त्रिपुरघ्नी च। ईशान्यां भस्मधारिणी ।१३।
ऊर्ध्वं सृष्ट्यादिकरणी। पातालेगमगामिनी अंतरं वाहूरूपा च। सर्वमेतो मम पप्र
च्छकू ।१४। एतत्तु कवचं दिव्यं सर्वदा तु पठेन्नरः न तस्य भयमाप्नोति भूतप्रेतपि
शाचतः ।१५। अणिमादिमहासिद्धिद्वारतिष्टति रंकवत्। राजापि वशतां याति।
किं पुनर्मानुषादयः ।१६। एककालं द्विकालं वा त्रिकालं श्रद्धयान्वितः। बालात
न्मयतां याति मंत्रसिद्धिर्भवेध्रुवं ।१७। आदौ कवचमारभ्य पश्चान्मंत्रं समुच्चरे
त्। त्रिबीजा अक्षरा बाला षट्बीजा च नवक्षरा ।१८। लघुमध्या तथा दीर्घा स
र्वकार्यार्थसाधिनी। विद्याकामेन जप्तव्यं तथैव धनकामया ।१९। कन्यार्थी चै
व पुत्रार्थी भार्यार्थी वनसंश्रयः। यं यं प्रार्थयते अर्थं तं तं प्राप्नोति मानवः ।२०।
लिखित्वा भूर्जपत्रेषु नित्यं पूजयते पुमान्। गृहे तस्य सदा लक्ष्मी निश्चला
पुत्रसंततिः ।२१। ईश्वर उवाच। इदं वर्मतु बालायाः त्वस्नेहात्कथितं मया। न देयं

॥बा०॥ शास्त्रदीनाय सत्यं सत्यं वदाम्यहं। २२। राज्यं देयं शिरो देयं पुत्रपत्नी तथैव च परं तु बाला
॥२॥ कवचं सर्वथा नैव दीयते। २३। सुभक्ताय सुशिष्याय दद्यात्सर्वं स्वदायिने। साधका
नां हितार्थाय यदुक्तं इंदुमौलिना। २४। वाबीजं प्रथमं रनंतरं महाकामाख्यसंज्ञोद्धि
तं। शास्त्या बीजनियोजनेन सुखपदे तत्तु बीजत्रयं। २५। आद्यं मध्यविलोमकेन क
थितं षड्डंगसंभावितं। यो जानाति नरः स एव शिवतः स्वस्थान तं चान्यथा। २६। इति
श्रीसारदातंत्रे बालाकवचं संपूर्णं। प्रथमकवचं समाप्तं॥ ओं अस्य श्रीबालापर
मेश्वरीकवचमंत्रस्य। श्रीबालामहादेव ऋषिः। ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः। पंक्तिछंदः। बा।
लापरमेश्वरी देवता मम चतुर्विधफलप्राप्त्यर्थे जपे विनियोगः। मूलेन षडंगं ध्या
नं। ओं पूर्वे मां भैरवी पातु बाला मां पातु दक्षिणे। मालिनी पश्चिमे पातु वासिनी।
चोत्तरे वतु। १। ऊर्ध्वे पातु सदा देवी श्रीबालात्रिपुरेश्वरी। अधस्तात्पातु देवेशी पा
तालतलवासिनी। २। आधारे वाग्भवं पातु कामराजस्तथा हृदि। महाविद्या भग
वती पातु मां परमेश्वरी। ३। ऐं क्लीं ललाटे पायात्। ऐं ह्रीं हंसः श्च नेत्रयोः। नासायां ॥२॥

© Dharmartha Trust J&K. Digitized by eGangotri

कर्णयोःपातु। स्हीं ह्रां ह्रीं चिबुके तथा। ४। ह्रौं मां पातु गले बाला हृदस्ही नाभिदे

श्यके। सौं क्लीं श्री गुह्यदेशेतु ऐं ह्रीं पातु पादयोः। ५। स्हां मां सर्वतःपातु संध्योपातु

जले स्थले। तथा काशे च पाताले दिक्ष्वंतरितःसदा। ६। वक्षो मां त्वरिता पातु मां चन्

महामहीन्मनोमम। हंसपायान्महादेवी परं निष्कलदेवता। ७। विजया मंगला दूती

कल्याणभगमालिनी। ज्वाला मां मालिनी नित्या सर्वत्र पातु मां सदा। ८। इत्येवं कव

चं देवी देवानामपि दुर्लभं। तव प्रीत्या मयाख्यातं गोपनीयं प्रयत्नतः। ९। इदं रहस्यं

परमं गुह्याद्गुह्यतरं प्रियं। धन्यं यशस्यमायुष्यं भोगमोक्षपरं शिवे। १०। आकर्षणं

वरं देवी स्तंभमोहकरं शिवे। इदं कवचमज्ञात्वा श्री बालात्रिपुरेश्वरी। ११। सर्वयोयो

जिनी दं दं स भक्तो नात्र संशयः। न तत्र मंत्रसिद्धिः स्यात्कदाचिदपि शांकरी। १२। इति

बालात्रिपुराकवचसमाप्तं। द्वितीयकवचं संपूर्णं। श्री पार्वत्योवाच। त्रैलोक्यं रक्ष

णार्थाय सर्वसिद्धिकरं परं। ब्रूहि तन्मे महाविद्या त्रिपुराबालास्वरूपिणी। १। ई

श्वरोवाच। कथयामि वरारोहे कवचं सर्वसिद्धिदं। कामदं मोक्षदं वापि सर्वोपद्र

© Dharmartha Trust J&K. Digitized by eGangotri

॥बा॰॥ नाशनं ।२। ओं अस्य श्रीबालाकवचस्य । भगवान् ऋषिः । अनुष्टुप् छंदः श्रीबा
॥३॥ लात्रिपुरा देवता । सर्वकामनासिद्ध्यर्थे जपे विनियोगः । ध्यानं । चतुर्भुजां त्रिने
त्रां च पाशांकुशशरं धनुः । सर्वशृंगारशोभाढ्यां ब्रह्माद्यासिद्धिसेवितां ।३। वाग्भ
3 वं हृदये पातु कामराजं च शीर्षके । शक्तिश्चैव शिखायां शक्तिः कवचाय च विन्यसे
त् ।४। कामराजम्भ्रुवौ चक्षुः शक्तिरस्त्राय फट् तथा । वाग्भवं च मुखे पातु काम
राजे हृदस्तथा ।५। शक्तिं पातु तथा नाभौ शक्तिः कटिद्वयोवतु । कामराजस्तथा ना
भौ पुनः शक्तिर्गुदे तथा ।६। सर्वांगे मे सदा पातु त्रिपुरा बालरूपिणी । त्रिकोणं
चैव षट्कोणं वसुपत्रं ततः परं ।७। षोडशारं ततो लख्यं चतुर्द्वारं ततो लिखेत् ।
यंत्रोद्धारं हृदयोक्तं जगन्मंगलकारकं ।८। यः पठेत्कवचं दिव्यं तापत्रयनिवारणं
धर्मार्थकाममोक्षं च ददाति त्रिपुरेश्वरी ।९। पठनात् धारणान् रक्षां सर्वत्र विजयी
भवेत् । यं यं चिंतयते कामं तत्सर्वं सिद्धिदं नृणां ।१०। इति श्रीशारदासमुच्चये बा ॥३॥
लात्रिपुराकवचं संपूर्णं ॥ तृतीयकवचं समाप्तं ॥ शुभमस्तु ॥ श्रीरस्तु ॥ राम ॥

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगुरुभ्यो नमः। ॐ अस्य श्रीबालात्रिपुरामंत्रस्य। दक्षिणामूर्त्ति ऋषिः। पंक्ति
छंदः। श्रीबालात्रिपुरसुंदरीदेवता। ऐं बीजं। क्लीं कीलकं। सौः शक्तिः। मम धर्मा
र्थकाममोक्षार्थे जपे विनियोगः। दक्षिणामूर्त्ति ऋषये नमः शिरसि। पंक्तिछंदसे
नमः। मुखे। श्रीबालात्रिपुरादेवतायै नमो हृदि। ऐं बीजाय नमः। गुह्ये। क्लीं कीलका
य नमः। पादयो। सौः शक्तये नमः। सर्वांगे। अथ करन्यासः। ऐं अंगुष्ठाभ्यां नमः।
क्लीं तर्जनीभ्यां नमः। सौं मध्यमाभ्यां नमः। ऐं अनामिकाभ्यां नमः। क्लीं कनिष्ठिका
भ्यां नमः। सौं करतलकरपृष्ठाभ्यां नमः। अथ हृदयादिन्यासः। ऐं हृदयाय नमः।
क्लीं सिरसे स्वाहा। सौं शिखायै वौषट्। ऐं कवचाय हुं। क्लीं नेत्रत्रयाय वौषट्। सौं
अस्त्राय फट्। इति हृदयादिन्यासः। अथ बाणन्यासः। ह्रीं द्रावणबाणाय नमः।
ललाटे। ह्रीं क्षोभणबाणाय नमः। कंठे। क्लीं वशीकरणबाणाय नमः। हृदि। क्लीं
आकर्षणबाणाय नमः। मूलाधारे। सः उन्मादबाणाय नमः। नाभौ। इति बाण
न्यासः। अथ कामन्यासः। क्लीं कामाय नमः। अंगुष्ठाभ्यां नमः। ऐं कंदर्पाय नमः।

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्रीं मीनकेतवे नमः। कनिष्ठिकाभ्यां नमः। संकरतलकरपृष्ठाभ्यां नमः। अथ हृदयादिः। क्लीं कामा
य नमः। हृदयाय नमः। ऐं कंदर्पाय नमः। शिरसे स्वाहा। सौं मनसिजाय नमः। शिखायै वौषट्। क्रूं
मकरध्वजाय नमः। कवचाय हुं॥ पंगत २।

॥बा०॥ तर्जनीभ्यां नमः। सौं मनंसिताय य नमः। मध्यमाभ्यां नमः। क्रूं मकरध्वजाय
॥५॥ य नमः। अनामिकाभ्यां नमः। स्त्रीं मीनकेतवे नमः। नेत्रत्रयाय वौषट्। सः अ
५ स्त्राय फट् इति हृदयादिन्यासः। ततो ध्यानं। बालां बालार्कवर्णां कुचभरनमि
तां कुंकुमारक्तवस्त्रां सर्वालंकारयुक्तां चकितमृगदृशामंकुशं पंचबाणान्। भू
लं चापं दधानामरुणहृल्लतले शोभमानां गयष्ठिं चंचच्चंद्रार्धचूडां हिमकरवद
नां सुंदरीं तां नमामि। इति ध्यानं। मानसोपचारैः। श्रीबालात्रिपुरां पूजयेत्। लं पृथ्वी
व्यात्मकं श्रीबालात्रिपुरायै चंदनं समर्पयामि। हं आकाशात्मकं श्रीबालात्रिपुरायै।
धूपं समर्पयामि। रं वह्न्यात्मकं श्रीबालात्रिपुरायै दीपं समर्पयामि। वं अमृतात्मकं
श्रीबालात्रिपुरायै नैवेद्यं समर्पयामि। सौं शक्त्यात्मकं श्रीबालात्रिपुरायै तांबूलं स
मर्पयामि। इति मानसोपचारैः स्वहृदये पूजयित्वा। अथ मंत्रस्य उत्कीलनं। ऐं ऐं सौं
क्लीं क्लीं ऐं सौं सौं क्लीं। इमं मंत्रं जपादौ दशधा जपेत्। अथ निष्कीलनं। आं ऐं क्रों न ॥५
मः। इति मंत्रं जपांते जपेत्। अथ मालापूजनं। ऐं मां माले महामाले। क्लीं सर्वशक्ति

© Dharmartha Trust J&K. Digitized by eGangotri

स्वरूपिणी। सौः चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव। इति मंत्रेण मालां प्रक्षाल्य।
ह्रीं सिद्ध्यै नमः। इति मंत्रेण मालां प्रक्षाल्य। गंधपुष्पाभ्यां संपूज्य। ऐं वागीश्वरी विद्महे
क्लीं कामेश्वरी धीमहि। सौं तन्नो शक्तिः प्रचोदयात्। मंत्रादौ दशधा जपेत्। पश्चान्मू-
लमंत्रं। अष्टोत्तरशतं जपेत्। जपांते। त्वं माले सर्वदेवानां प्रसीद शुभदा भव। शुभं कुरुष्व
मे भद्रे यशो वीर्यं च सर्वदा। इति मंत्रेण मालां संस्थाप्य। हस्ते जलं गृहीत्वा गुह्यातिगुह्य
गोप्त्री त्वं गृहाणास्मत्कृतं जपं। सिद्धिर्भवतु मे देवी त्वत्प्रसादान्महेश्वरी। ॥ इति मंत्रेण
देव्या हस्ते जलं निवेद्य। इति जपविधिः। प्रथमं सामान्यार्घं स्थापयेत्। अग्रमत्स्यमुद्र-
या त्रिकोणं वृत्तं चतुरस्रं भूगृहं कृत्वा। आं आधारशक्तये नमः। इति संपूज्य त्रिकोणे
परिमुक्ताफट्। इति पात्रं प्रक्षाल्य। आधारोपरि मुक्तौ मूलेन संपूज्य। मूलेन जलमा-
पूर्य। गंगे च यमुने चैव गोदावरि सरस्वती। नर्मदे सिंधुकावेरी जलेस्मिन्सन्निधिं कुरु॥
क्रौं इति अंकुशमुद्रया सूर्यमंडलात्तीर्थान्यावाह्य। मूलेन गंधपुष्पाक्षतैः संपूज्य॥
वं इति धेनुमुद्रया अमृतीकृत्य। तदुपरि अष्टवारं मूलमंत्रं जपेत्। तज्जले द्वारदेवतां से

© Dharmartha Trust J&K. Digitized by eGangotri

॥बा०॥ पूज्य ह्रीं श्रीं त्रिपुराचीमंडपायनमः। मूलेनद्वारं प्रोक्ष्य। ऊर्ध्वोंबरमध्ये। श्रीगणेशायनमः।
॥५॥ सरस्वत्यैनमः। धात्रेनमः। विधात्रेनमः। अधः महालक्ष्म्यैनमः। गंगायैनमः। दक्षेयमु
5 नायैनमः। वामेसरस्वत्यैनमः। ऊर्ध्वे महालक्ष्म्यैनमः। इतिद्वारदेवतासंपूज्य। आदौस्व
हृदयेचक्रस्थानेरत्नसिंहासनविचिंत्य। देवेशिभक्तिसुभेपरिवारसमन्विते। यावत्वां
पूजयिष्यामितावत्वंसुस्थिराभव। इतिपठित्वापुष्पोमुक्तिं निधाय। ततोमूलमुच्चार्य।
सांगायैसायुधायैसपरिवारायैश्रीत्रिपुरबालायै। इहागच्छइहागच्छ। इतिमंत्रपठन्।
कुलमुद्रैनिधायइत्यावाहय। इतिअवाहनं। स्थापनमुद्रयासंस्थाप्य। इतिस्थापनं।
तथास्नानायदेवीसंप्रार्थ्य। ततोमूलेनश्रीबालात्रिपुरायै। पंचामृतेनस्नानं। स्नानां
तेआचमनीयं। ततोदेवीमुखोपदिष्टांभावयित्वा। श्रीबालात्रिपुरायै। आसनंउपवि
शेत्। गंधाद्यैःपूजयेत्। श्रीबालात्रिपुरायैअष्टगंधंसमर्पयामि श्रीबालात्रिपुरा
येदेव्यैपुष्पाणिपरिकल्पयामि। इतिमुकुटंपरिपुष्पाणिपरिकल्पयामि। वारत्रयं ॥५॥
अथअवर्णपूजा। हृदयशक्त्येनमः। शिरशक्त्येनमः। नेत्रशक्त्येनमः। अस्त्रश

© Dharmartha Trust J&K. Digitized by eGangotri

न्तायेनमः। इतिसंपूज्य। पुष्पांजलिंनिक्षिप्य। त्रिकोणेरत्यैनमः। प्रीत्यैनमः। मनोभ
वायैनमः। इतिसंपूज्य। मूलेनदेवीमाराध्य। मूलेनपुष्पांजलिः। अभीष्टसिद्धिंमेदे
हिशरणागतवत्सले। भक्त्यासमर्पयेतुभ्यंप्रथमावर्णार्चनं। ततः उत्तरस्यांबाण
द्वयं। द्रांक्षोभणबाणायनमः। द्रुद्रावणबाणायनमः। ततोअग्ने। सः उन्मादबाणा
यनमः। मूलेनदेवीमाराध्य। मूलेनपुष्पांजलि। अभिष्टसिद्धिमे०। द्वितीयावर्णार्चनं॥
ततः उत्तरस्यांबाणद्वयं। आकर्षणबाणायनमः। द्रांवशीकरणबाणायनमः। ततो
अग्ने सः उन्मादबाणायनमः। मूलेनदेवीमाराध्य मूलेनपुष्पांजलि। अभिष्टसिद्धिं०॥
तृतीयावर्णार्चनं। ततोउत्तरे। ह्रींकामायनमः। क्लींमन्मथायनमः। ततोदक्षिणे। ऐं
कंदर्पायनमः। ब्लूंमकरध्वजायनमः। अग्ने। स्त्रीमीनकेतवेनमः। मूलेनदेवीमारा
ध्य मूलेनपुष्पांजलिः। अभिष्टसिद्धिंमेदेहि०। चतुर्थावर्णार्चनं। ततोकोणेषुपूर्वा
दिक्रमेण। अनंगकुसुमायनमः। अनंगमेखलायनमः। अनंगमदनायनमः। अनंग
मदनातुरायनमः। सुभगायनमः। भुभगायनमः। भगसर्पीणीनमः। भगमालायेनमः॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥बा०॥ इति प्रदक्षिण्येन पूजयेत्। मूलेन देवीमाराध्य। मूलेन पुष्पांजलिः। अभिष्टसि
॥६॥ द्धिमे०। पंचमावर्णार्चनं। ततो अष्टदले। असितांगभैरवायनमः। क्रोधभैरवायन
6 मः। रुरुभैरवायनमः। उन्मत्तभैरवायनमः। कपालभैरवायनमः। भीषणभैरवा
यनमः। संहारभैरवायनमः। मूलेन देवीमाराध्य। मूलेन पुष्पांजलिः। अभिष्टसि
द्धिमे०। षष्टावर्णार्चनं। ततो गंधिस्थाने पीठानि पश्चिमादिक्रमेण। कामरूपी।
ठायनमः। मलयपीठायनमः। कोहिलगीरीपीठायनमः। कुलांतपीठायनमः।
चौहारपीठायनमः। जालंधरपीठायनमः। उड्याणपीठायनमः। देवीकोटपीठा
यनमः। मूलेन देवीमाराध्य। मूलेन पुष्पांजलिः। अभिष्टसिद्धिमे०। सप्तमावर्णा
र्चनं। लं इंद्रायनमः। अग्नयेनमः। यं यमायनमः। क्षंां नैरृतयेनमः। वं वरुणा
यनमः। यं वायवेनमः। सं सोमसहितकुबेरायनमः। हों ईशानायनमः। ॐ ऊर्ध्वं ब्रा
ह्मणेनमः। अधः अनंतायनमः। मूलेन देवीमाराध्य। मूलेन पुष्पांजलिः। अ ॥६॥
भिष्टसिद्धिमे०। अष्टमावर्णार्चनं। वज्रायनमः। शक्तयेनमः। दंडायनमः। खड्गा

© Dharmartha Trust J&K. Digitized by eGangotri

यनमः। पाशायनमः। अंकुशायनमः। गदायैनमः। त्रिशूलायनमः। पद्मायन
मः। चक्रायनमः। मूलेनदेवीमाराध्य मूलेनपुष्पांजलिः। अभिष्टसिद्धिंमेदेहि
शरणागतवत्सले। भक्त्यासमर्पयेतुभ्यंनवमावर्णार्चनं। ९। श्रीबालात्रिपुरा
यैनमः। फलार्घ्यंसमर्पयामि। श्रीबालात्रिपुरायैनमः। तांबूलं समर्पयामि। अं
बीरं समर्पयामि। गुलालं समर्पयामि। सिंदूरं समर्पयामि। नमस्कारं समर्पया
मि। एतेउपचाराः। सामान्यार्घजलेन समर्पयामि। इतिआवरणपूजा। ततोबलि
दानं। बांबटकायनमः। इतिबरकमंडलं संपूज्य। तस्योपरिबलिंनिधाय। एह्ये
हिदेवीपुत्रबटुकनाथकपलजटाभार। भासकरनेत्रत्रज्वालामुखममसर्व
विघ्नान्नाशयसर्वोपचारसहितंबलिंगृह्णरस्वाहा। इत्याबाह्य। गंधपुष्पा
क्षतैः। संपूज्य। बटुकनाथायनमः। इतिबलमुत्सृजेत्। ततोमूलेनपूर्ववत्॥
प्राणापानऋष्यादिकरषडंगविधाय। यथाशक्त्याजपंकृत्वा। गुह्यातिगुं०॥
समर्पयेत्। देव्याहस्तेजलं समर्पयेत्। ततः समयिकान्सर्वान्समाहूयानि

© Dharmartha Trust J&K. Digitized by eGangotri

॥बा०॥ वेदयेत् । गंधपुष्पाभ्यां संपूज्य । किंचिदुदकं गृहीत्वा । मां मदीयं च सकलं । श्रीबाला
॥७॥ त्रिपुरसुंदरी समर्पयामि । यं यं स्पृशामि हस्तेन यं यं पश्यामि चक्षुषा । स एव दा
7 सतां याति यदि शक्रसमो भवेत् । अनेन तिलकं कृत्वा । प्रथमं नैवेद्यं गुरवे दत्त्वा
पश्चात् साधकेभ्यो दत्त्वा । शेषं स्वयं गृहीत्वा । स्वशिरसि पुष्पाणि धृत्वा । देवीं सं
प्रार्थ्य । आत्मानं कामकलारूपं विभाव्य । स्वगुरुं संपूज्य । श्रीगुरवे यथाशक्त्या
दक्षिणां दत्त्वा । श्रीगुरुं संप्रार्थ्य । प्रणम्य पात्रलेपं ब्रह्मरंध्रे कृत्वा । स्वशिरसि पु
ष्पं धृत्वा । विसर्जयेत् । अंतःशाक्ता बहिःशैवाः सभामध्ये तु वैष्णवाः । नानारूप
धराः कौला विचरंति महीतले । इति श्रीमंत्रमहोदधौ बालात्रिपुरसुंदरीप
द्धतिसमाप्तं । शुभं भूयात् ॥ श्रीगणेशाय नमः । श्रीबालात्रिपुरायै नमः श्रीना
थादिगुरुत्रयं गणपतिपीठत्रयं भैरवं सिद्धिभ्यां बटुकत्रयं पदयुगं घृतिक्र
मं शांभवं । वीरे चाष्टचतुष्षष्टिनवकं वीरावलीपंचकं श्रीमन्मालिनिमंत्ररा ॥७॥
जसहितं वंदे गुरोर्मंडलं ॥१॥ देहस्थाखिलदेवता गजमुखाः क्षेत्राधिपा भैरवा ।

© Dharmartha Trust J&K. Digitized by eGangotri

योगिन्यो बटुकाश्च यक्षपितरो वैतालकाश्चेटकाः। अन्ये खेचरभूचरा निशिच
राभूताः पिशाचा ग्रहाः। तृप्यंतां कुलदेव कस्यापिवतां श्रीनाथपात्रामृतं॥२॥
श्रीमच्छंकरशेखरप्रविलसत् चंद्रामृतं ध्यावितं। क्षेत्राधीश्वरयोगिनीमुनि
गणैः सिद्धैः समाराधितं। आनंदार्णव कं नवात्मकमिदं साक्षात्त्रिखंडामृतं
तत्पात्रं प्रथमं करांबुजगतं वंदे विशुद्धिप्रदं॥१॥ सर्वात्मैकमिलत्कलाकुलक
लाकोलद्दलद्योतितं। इंद्रोपेंद्रमहेंद्रसहितं ब्रह्मादिभिः सेवितं। ध्यातं देवीपर
स्तुतं मुनिजनैर्मोक्षार्थिभिः स दा। वंदे पात्रमहं द्वितीयमधुनानंदैकसंवर्ध
नात्॥२॥ दिव्यं मानरसायनं हरिहरब्रह्मादिभिः सेवितं॥ मुद्रामैथुनधर्मकर्मनि
तरां क्षारांम्लतिक्ताश्रयं। आचार्योर्चितमष्टभैरवकलान्यासं न संशोधितं। पा
पात्रं प्रमकारशुद्धिसहितं पात्रं तृतीयं भजे॥३॥ चिच्छ्मोद्भूतिसगोलकुंडसुख
दं ब्रह्मादिरुद्रार्चितं। मन्मा गलमुत्तमोत्तमरसं संशोध्य दिव्यामृतं। नाला
ज्यं प्रथमोगनादिकुसुमं दिव्यं च सर्वेश्वरं। तद्द्रव्यं च समस्तपुण्यसुखदं पात्रं
चतुर्थं भजे॥४॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥पा०॥ सर्वैधर्मकलागमाधिकपरं वंदे सुखैर्भाषितं । देवानामपि दुर्लभं सुखकरं गुप्ततर
॥५॥ हस्यान्वितं । आनंदोद्भवनादबिंदुपरयात्रात्तयालसद्भैरवै पीतं ब्रह्मसमयं सदोदि
४ तकरं पात्रं भजे पंचमं । ५ । छत्रं चामरभद्रपीठपरमानंदोदितं दायिनं । रामाराज्य
मनोहरं शुभकरं सायुज्यसाम्राज्यदं । [illegible] नानाव्याधिभयौघकारहरणं
जन्मादिभिन्नोत्रानं । श्रीमत्सुंदरीतर्पणद्रवरसं पात्रं भजे षष्ठमं । ६ । जाग्रत्स्वप्नसु
षुप्तितुर्यपरमचैतन्यसाक्षिप्रदं विद्युद्भास्करचंद्रसेंद्रधनुषां ज्योतिःकलाव्या
पितं । ईडापिंगलमध्यगात्रिवलयामनकुंडला चोर्ध्वगं । पात्रं सप्तमपूरणे लयरा
पानंदादिकं पातु मां । ७ । खड्गं पादुकमंजनं च गुटिकां संसारखलं संप्रदं । मन्त्रोर्वेच
नसुगमकारहरणं देहस्थितेकारणं । वाचासिद्धिकरं मनःस्थिरकरं वश्यं जगद्यो
षितं । पात्रं चाष्टममष्टसिद्धिकरणं प्रौढप्रसन्नं सदा । ८ । सर्वानंदकरं सदाशिवहृ
दं दुंदुकमुक्तिप्रदं साम्राज्यं सुखदं मनोरथकरं अज्ञानविध्वंसनं । आयुःकीर्तिय ॥८॥
शोविवर्धनकरं संसारमोहच्छिदं पात्रं यं नवनाथशक्तिनवकं प्रोढं प्रजापोदितं
॥९॥

© Dharmartha Trust J&K. Digitized by eGangotri

ब्रह्माविष्णुमहेशानां देवानां च विशेषतः। दुर्लभं पावनं पात्रं दशमं प्रणमाम्यहं॥
॥१०॥ पापघ्नं शांतिदं शुद्धं दत्तानंदशुभावहं। पात्रमेकादशं वंदे गुरुसंवादपरां गतिं॥
११ आश्रमस्थानयोगस्थो तीर्थसेवापरेण च। स्मरणात् दर्शनात् मुक्तिर्नमामि
द्वादशं परैः। १२। इति मंत्रात्मकैः पात्रं दत्वा। तु साधकैः लभते सर्वकामान्वै दे
हांते भैरवो भवेत्. इति शंकरीपद्धतौ पात्रद्वादशश्लोकसंपूर्णं। शुभं भवतु॥
अथ बालात्रिपुरास्तोत्रं लिख्यते। ॐ। आद्ईनेद ॐ वल्ली अमृतकरतलैः आदि
शक्ति पराई। माई माया स्वरूपी स्फटिकमणिमयी मामतंगी त्रिशांगी। ज्ञानी।
ज्ञानार्थरूपी ललितपरतलेनादि ॐकारमूर्ति। भोगी योगासनस्थां भुवनव
शाकरी सुंदरी ऐं नमस्ते। १। माला मंत्रकराक्षी मम हृदयसवे मंत्रमारंप्रचंडी।
ज्वाला यज्ञोपवीति विकटकटिमयी वीरतंत्री प्रसारा। बालबालेंदुमूले मदनग
जभुजे मस्तले पेषु तंत्रे। काली कंकालरूपी स्फुरितफणी कृताकारणी। क्लीं
नमस्ते। २। मूलाधारे महास्यिकुतवदपालि लं मौलमंत्रं त्रिनेत्रं। हाराके यूरवल्ली

© Dharmartha Trust J&K. Digitized by eGangotri

॥बा०॥ अखिलत्रियपुरीअंबिकाईप्रियाई। येदेवेदांतनादेवितनयनशास्वीवीरतंत्रोपसा
॥९॥ रे। सारासंसारवासीसकलसुखकरीसुंदरीसौः नमस्ते॥३॥ ऐं ह्रीं श्रीं मंत्ररूपीसक
लगुणमायीसंप्रदा आत्मरूपिणी। क्लीं श्रीं ह्रीं बीजमुख्येहिमकरदिनकृतं ज्यो
9 तिरूपंप्रभावै। श्रीं क्लीं ऐं मंत्रशक्तिप्रणवयुतां बिंदुनादात्मकोटि। क्षांक्षींक्षौं
कामन्यासैकरतुलितकराकालिकस्त्वांनमस्ते॥४॥ अध्यात्मध्यानरूपी असु
रभयकरी आत्मनायासुसुद्धी। प्रत्यक्षापीठमोलेकृतसकलसुखं ब्रह्मशक्ति
स्त्रिरूपी। अध्यात्मसाध्यरूपी बुधमविकरंस्तोत्रसंक्षोभशक्ति। सेष्टास्तुतूप्य
त्रमुक्तित्रिपुरहरहरहरेसर्वदेवैनमस्ते॥५॥ इतिश्रीबालापद्धतिप्रजातथापात्र
स्तोत्रकवचंसमाप्तं। शुभमस्तु। श्रीरस्तु। श्रीकृष्णार्पणं। लिखितंजवाहिरगिर॥

ॐ ऐं क्लीं सौः बालायैनमः ॐ ऐं त्रिपुरादेविविद्महे क्लीं कामेश्वर्यैधीम
हि सौः तन्नोमुक्तिप्रचोदयात्। इतिगायत्री ॐ प्राणायामादिकृत्वा मालेमालेत्यादि ॥९॥

© Dharmartha Trust J&K. Digitized by eGangotri

मूलेनापिसंपूज्य क्लीं सौं ऐं ऐं ऐं इ क्लीं कीलनं त्रिः ३ सौं ऐं क्लीं इतिसंजीवनं त्रिः ३
नंथंदं मूलं धंनं इति त्रिः तोटिं क्लीं पठेत् ३ ॐ ह्रीं श्रीं वाल्मे ह्रीय शापं विमोचय वि
मोचय फट् स्वाहा १० ऐं सौं श्रीं ह्रीं श्रीं कुह कुल्लायै स्वाहा ३ ऐं नमो त्रिपुराय दह दह दु
रितं क्लीं हन हन कीलान् सौं स्वाहा १० ततः कामेश्वरमंत्रं दशाध्या जप्त्वा मालां गृ
हीत्वा मूलं पठेन्यथाशक्ति जपं समाप्य जपान्ते त्वं मालेति पुनरपि प्राणायामा
दि सौं ऐं क्लीं इति संपुटमंत्रं त्रिः जप्य कामेश्वरमंत्रं दशाध्या जप्त्वा गुह्याति गु
ह्येति जपफलं समर्प्य॥

© Dharmartha Trust J&K. Digitized by eGangotri

।शिवराम व· ४

10

कंगलारवारचिट्टा
जवरवार
सुहागा
नसपाल
कुकड
मघा
नवसादर सर्वसमान वसूटीकेरस
सोरवलल करना
दालचिक नामासे [illegible] पंच
मिलावे तीन सिकड दूर करना
अनपाइन तीन मासे एकेस
गुड पुराना दहीके साथ गोली खावे गी

॥बालापद्धति पूजा पात्र स्तोत्र कवचादि ॥

१०७५

© Dharmartha Trust J&K. Digitized by eGangotri